# Pramanadipika

# પ્રમાણદીપિકા

## Document Information

Text title : Pramanadipika

File name : pramANadIpikA.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2024

*sanskritdocuments.org*

# પ્રમાણદીપિકા

## અથ પ્રથમો મયૂખઃ

રામં સીતાં તથાચાર્યં શ્રિયાનન્દં પ્રણમ્ય ચ ।
પ્રમાણાનાં પ્રકાશાય કુર્વે પ્રમાણદીપિકામ્ ॥ ૧॥

અથ પ્રત્યક્ષપ્રમાણમયૂખઃ
ચિદચિદીશતત્વાનાં જ્ઞાનં પ્રામાણિકં ચ યત્ ।
મોક્ષસ્ય સાધનં તદ્ધિ ભોક્તા ભોગ્યમિતિ શ્રુતેઃ ॥ ૨॥

પ્રમાયાઃ કરણં તત્ર પ્રમાણ સમ્મતં બુધૈઃ ।
અબાધવ્યવહારસ્યાનુગુણા તુ મતિઃ પ્રમા ॥ ૩॥

કરણં ચાવગન્તવ્યં વ્યાપારશાલિ કારણમ્ ।
ત્રિધા પ્રમાણમધ્યક્ષાનુમાનશબ્દભેદતઃ ॥ ૪॥

સમ્ભવસ્યોપમાનસ્ય ચાર્થાપત્તેસ્તથૈવ હિ ।
અન્તર્ભાવોઽનુમાને તુ તત્ત્વજ્ઞૈરુરરીકૃતઃ ॥ ૫॥

ઐતિહ્યમાપ્તમૂલં યચ્છબ્દે ચાન્તર્ભવત્યદઃ ।
અનુમાનાઙ્ગતર્કસ્ય મન્યતે સ્વાઙ્ગિરૂપતા ॥ ૬॥

ભાવાન્તરેણ ચાભાવપ્રતીતિરુપપદ્યતે ।
અભાવાખ્યઃ પદાર્થશ્ચાતિરિક્તો મન્યતે ન તત્ ॥ ૭॥

અતિરિક્તં પ્રમાણં તન્નાનુપલબ્ધિનામકમ્ ।
અભાવસાધકત્વેન પ્રમાણજ્ઞૈર્હિ મન્યતે ॥ ૮॥

અનુમાધ્યક્ષશાબ્દીતિભેદાત્ ત્રિધા મતા પ્રમા ।
જ્ઞાનાકરણકં જ્ઞાનં પ્રત્યક્ષત્વેન સમ્મતમ્ ॥ ૯॥

પ્રત્યક્ષં દ્વિવિધં ચાથ તત્રાદ્યં નિર્વિકલ્પકમ્ ।
અનેકવૃત્તિજાત્યાદ્યવિષયા શેમુષી હિ તત્ ॥ ૧૦॥

પ્રત્યક્ષ ચાપરં પ્રોક્તં વિદ્વદ્ભિઃ સવિકલ્પકમ્ ।
અનેકવૃત્તિજાત્યાદિવિષયા શેમુષી ચ તત્ ॥ ૧૧॥

પ્રત્યક્ષં દ્વિવિધં ચૈતદ્ દ્વૈવિધ્યં ચ ગતં પુનઃ ।
અર્વાચીનમથાઽનર્વાચીનઞ્ચેતિ વિભેદતઃ ॥ ૧૨॥

એકમિન્દ્રિયસાપેક્ષમપરં તદ્વિલક્ષણમ્ ।
સ્વયંસિદ્ધં ચ દિવ્યં ચ દ્વિવિધમાદિમં તથા ॥ ૧૩॥

યોગજન્યં ચ તત્રાદ્યં પરઞ્ચેશપ્રસાદજમ્ ।
પ્રત્યક્ષાનુભવે તત્ર કરણમિન્દ્રિયં મતમ્ ॥ ૧૪॥

વ્યાપારસ્તત્ર સંયોગઃ સંયુક્તાશ્રયણં તથા ।
અર્વાચીનેતરદ્ બોધ્યં પ્રત્યક્ષમીશમુક્તયોઃ ॥ ૧૫॥

પૂર્વાનુભવતશ્ચાત્ર સંસ્કૃતિરુપજાયતે ।
સદૃશાદૃષ્ટચિન્તાદ્યૈરુદ્બુદ્ધા સંસ્કૃતિર્ભવેત્ ॥ ૧૬॥

ઉદ્બુદ્ધસંસ્કૃતેર્જાતા સ્મૃતિઃ પ્રત્યક્ષમેવ હિ ।
પ્રતિભા પ્રત્યભિજ્ઞે ચ પ્રત્યક્ષે એવ સમ્મતે ॥ ૧૭॥

યથાર્થ સર્વવિજ્ઞાનમિતિ વેદવિદાં મતમ્ ।
શુક્તાવપિ હિ રૌપ્યાંશાઃ પઞ્ચીકરણતો મતાઃ ॥ ૧૮॥

શુક્તિરૌપ્યમતેસ્તસ્માત્ સત્યાલમ્બનતા મતા ।
શુક્તિરૌપ્યમતિર્ભ્રાન્તા રૌપ્યાંશાલ્પત્વહેતુતઃ ॥ ૧૯॥

- ઇતિ પ્રતિપક્ષિભયઙ્કુર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધશિરોમણિપ્રણીતાયાં પ્રમાણદીપિકાયાં પ્રત્યક્ષપ્રમાણનિરુપણાખ્યઃ
પ્રથમો મયૂખઃ ॥ ૧॥

## અથાનુમાન પ્રમાણમયૂખઃ

અનુમાકરણં ચાથાનુમાનં પરિકીર્ત્તિતમ્ ।
સાધકતમમેવાત્ર કરણં પ્રાજ્ઞસમ્મતમ્ ॥ ૧॥

તતો લિઙ્ગપરામર્શોઽનુમાયાં કરણં મતમ્ ।
વ્યાપ્યસ્ય પક્ષવૃત્તિત્વધીઃ પરામર્શનામિકા ॥ ૨॥

તજ્જા ચાનુમિતિઃ પક્ષે સાધ્યબુદ્ધિર્મતા બુધૈઃ ।

સાધ્યાધારસ્થતા હેતૌ વ્યાપ્તિઃ પ્રાજ્ઞૈઃ પ્રકીર્ત્તિતા ॥ ૩॥

સાહચર્યસ્ય ભૂયિષ્ઠદર્શનાદ્ વ્યાપ્તિધીર્ભવેત્ ।
તદ્દર્શનં સપક્ષે હિ ભવેન્નિશ્ચિતસાધ્યકે ॥ ૪॥

સાધ્યશૂન્યો વિપક્ષશ્ચ પક્ષઃ સન્દિગ્ધસાધ્યકઃ ।
અન્વયવ્યતિરેકી હિ હેતુશ્ચ કેવલાન્વયી ॥ ૫॥

યત્સત્ત્વે ખલુ યત્સત્ત્વમન્વયવ્યાપ્તિરીરિતા ।
યચ્છૂન્યત્વં ચ યચ્છૂન્યેઽભાવ્યાપ્તિર્હિ સાધને ॥ ૬॥

અન્વયવ્યાપ્તિતશ્ચાથાન્વયી હેતુર્બુધૈર્મતઃ ।
અભાવવ્યાપ્તિતો હેતુર્વ્યતિરેકી સમીરિતઃ ॥ ૭॥

સિદ્ધાન્તે દ્વિવિધશ્ચૈવ સદ્ધેતુર્બુધસમ્મતઃ ।
કેવલવ્યતિરેકી તુ સિદ્ધાન્તે મન્યતે ન હિ ॥ ૮॥

ઉભે ચાત્રાનુમાનાઙ્ગે વ્યાપ્તિશ્ચ પક્ષધર્મતા ।
દ્વયોરન્યતરસ્યાથ વિરહે હેતુદુષ્ટતા ॥ ૯॥

વ્યભિચારી વિરુદ્ધોઽથાસિદ્ધઃ સત્પ્રતિપક્ષકઃ ।
બાધિતશ્ચેતિ પઞ્ચાપિ હેત્વાભાસાઃ પ્રકીર્ત્તિતાઃ ॥ ૧૦॥

હેતુશ્ચ વ્યભિચારી હિ સ્વસ્થાનાતિક્રમે ભવેત્ ।
સ હ્યનૈકાન્તિકશ્ચાથ દ્વિવિધઃ પરિકીર્ત્તિતઃ ॥ ૧૧॥

વિપક્ષેઽપિ સ્થિતશ્ચેત્ સ સાધારણો મતસ્તદા ।
બુધૈઃ સ પક્ષમાત્રસ્થોઽસાધારણ ઉદાહૃતઃ ॥ ૧૨॥

સાધ્યાભાવેન સ વ્યાપ્તો વિરુદ્ધત્વેન સમ્મતઃ ।
આદિમસ્ત્રિષ્વસિદ્ધેષ્વાશ્રયાસિદ્ધઃ સમીરિતઃ ॥ ૧૩॥

પક્ષશ્ચ પક્ષતાઽવચ્છેદકશૂન્યશ્ચ તત્ર હિ ।
પક્ષે ચ હેતુરાહિત્યં સ્વરૂપાસિદ્ધતા સ્મૃતા ॥ ૧૪॥

વ્યાપ્યત્વાસિદ્ધતા ચાત્ર દ્વિધા પ્રાજ્ઞૈઃ સમર્થિતા ।
વ્યાપ્તિગ્રાહકમાનસ્ય શૂન્યત્વાત્ તત્ર ચાદિમા ॥ ૧૫॥

હેતાવુપાધિસત્ત્વાચ્ચ દ્વિતીયા સમ્મતા બુધૈઃ ।
સાધ્યવ્યાપકતાયાં ચ સાધનાવ્યાપકત્વકમ્ ॥ ૧૬॥

ઉપાધિત્વેન સમ્પ્રોક્તં હેતોઃ પરમદૂષણમ્ ।
પ્રતિપક્ષસ્ય સત્ત્વે તુ હેતોઃ સત્પ્રતિપક્ષતા ॥ ૧૭॥

યસ્ય પ્રબલમાનેન સાધ્યાભાવો વિનિશ્ચિતઃ ।
દાર્શનિકૈઃ સ હેતુર્હિ બાધિતઃ સમ્પ્રકીર્ત્તિતઃ ॥ ૧૮॥

અનુમાનં દ્વિધા સ્વાર્થં પરાર્થં ચેતિ ભેદતઃ ।
સ્વાર્થેન સ્વાનુમા ચાત્ર પરાર્થેન પરાનુમા ॥ ૧૯॥

ન્યાયજસ્તુ પરામર્શઃ પરાનુમિતિકારણમ્ ।
ન્યાયસ્તત્ર પ્રતિજ્ઞાદ્યવયવપઞ્ચકં મતઃ ॥ ૨૦॥

મતિજ્ઞા સાધ્યનિર્દેશો હેતૂક્તેર્હેતુતા તથા ।
વ્યાપ્તિનિર્દેશપૂર્વા હિ દૃષ્ટાન્તોક્તિરુદાહૃતા ॥ ૨૧॥

વ્યાપ્યસ્ય પક્ષવૃત્તિત્વબોધશ્ચોપનયો મતઃ ।
નિગમનં તુ સાધ્યસ્યોપસંહારવચઃ ખલુ ॥ ૨૨॥

નૈયાયિકા ભવન્ત્યેતત્પઞ્ચાવયવવાદિનઃ ।
વેદાન્તિનો વદન્ત્યેષ્વનુમાસિદ્ધૌ યથારુચિ ॥ ૨૩॥

- ઇતિ પ્રતિપક્ષિભયઙ્કર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધશિરોમણિપ્રણીતાયાં પ્રમાણદીપિકાયામનુમાનપ્રમાણનિરૂપણાખ્યો
દ્વિતીયો મયૂખઃ ॥ ૨॥

## અથ શબ્દપ્રમાણમયૂખઃ

અનાપ્તાનુક્તવાક્યસ્ય શબ્દપ્રમાણતા મતા ।
દ્વારં પદાર્થબુદ્ધિશ્ચ શક્તિધીઃ સહકારિણી ॥ ૧॥

વાક્યં પદસમૂહશ્ચ શક્તં પદતયા મતમ્ ।
અભિધાખ્યા ચ શક્તિર્હિ વેદસ્યાર્થાવબોધિતા ॥ ૨॥

મુખ્યા વૃત્તિઃ પદસ્યાર્થે સૈવ પ્રાજ્ઞૈરુદીરિતા ।
ઘટે ઘટેત્યુક્તે હિ શક્તિર્ઘટપદસ્ય ચ ॥ ૩॥

સમ્બન્ધોઽભિહિતઃ પ્રાજ્ઞૈર્વૃત્તિઃ પદપદાર્થયોઃ ।
મુખ્યાર્થસ્ય હિ બાધે તુ વૃત્તિર્મતૌપચારિકી ॥ ૪॥

ગૌણી ચ લક્ષણા ચેતિ ભેદાત્ સા દ્વિવિધા પુનઃ ।

શક્યસ્ય ગુણવત્ત્વેન ત્વાદ્યા વૃત્તિર્મતા બુધૈઃ ॥ ૫॥

લક્ષણા શક્યસમ્બન્ધઃ સાઽન્વયાનુપપત્તિતઃ ।
જહદથાજહચ્ચેતિ દ્વિધા સા પરિકીર્ત્તિતા ॥ ૬॥

આકાઙ્ક્ષાયોગ્યતાઽઽસત્તિમદ્ વાક્યં હિ પ્રમાણકમ્ ।
પ્રમાણમખિલો વેદઃ સિદ્ધે વ્યુત્પત્તિસમ્ભવાત્ ॥ ૭॥

ભાગદ્વયં હિ વેદસ્ય કર્મબ્રહ્માભિધાયકમ્ ।
તત્રાદ્યે કથિતં કર્મ બ્રહ્મારાધનલક્ષણમ્ ॥ ૮॥

શાસ્ત્રે હિ પૂર્વમીમાંસાઽઽખ્યેઽસ્ય શઙ્કાઃ સમાહિતાઃ ।
બ્રહ્મણો વર્ણિતં ચાન્ત્યે સ્વરૂપં ચ ગુણાદિકમ્ ॥ ૯॥

એતચ્છઙ્કાસમાધાનં મીમાંસા ચોત્તરા મતા ।
મતા મીમાંસયોસ્તસ્માદુભયોરેકશાસ્ત્રતા ॥ ૧૦॥

વિધ્યર્થવાદમન્ત્રેતિભેદાદ્વેદસ્ત્રિધા મતઃ ।
સમ્મતસ્તત્ર વિદ્વદ્ભિર્વિધિવાક્યં પ્રવર્ત્તકમ્ ॥ ૧૧॥

વિધિરત્યન્તમપ્રાપ્તે નિયમઃ પાક્ષિકે સતિ ।
તત્ર ચાન્યત્ર ચ પ્રાપ્તૌ પરિસઙ્ખ્યેતિ ગીયતે ॥ ૧૨॥

ઇત્યેવં હિ વિધિઃ પ્રાજ્ઞૈસ્ત્રિવિધઃ સમ્પ્રકીર્ત્તિતઃ ।
નિત્યો નૈમિત્તિકઃ કામ્યશ્ચાપિ ભેદા વિધેર્મતાઃ ॥ ૧૩॥

પ્રવૃત્ત્યુત્તમ્ભકં વાક્યમર્થવાદતયા મતમ્ ।
મન્ત્રત્વેન મતો વેદોઽનુષ્ઠેયાર્થપ્રકાશકઃ ॥ ૧૪॥

શિક્ષા વ્યાકરણં છન્દો નિરુક્તં જ્યોતિષં તથા ।
કલ્પશ્ચેતિ ષડઙ્ગાનિ વેદસ્યોક્તાનિ વૈદિકૈઃ ॥ ૧૫॥

પૂર્વક્રમવિશિષ્ટા હિ વેદાશ્ચેશસમીરિતા ।
નિત્યા અપૌરુષેયાસ્તે તસ્માદ્ બુધૈશ્ચ સમ્મતાઃ ॥ ૧૬॥

નિત્યો વેદશ્ચ નિર્દોષો વક્ત્રભાવાદ્ધિ સમ્મતઃ ।
પ્રામાણ્યં હિ બુધૈર્વેદે સ્વીકૃતં સ્વત એવ તત્ ॥ ૧૭॥

સ્મૃત્યાદેસ્તુ પ્રમાણત્વં વેદમૂલતયા મતમ્ ।
શાસ્ત્ર વેદવિરુદ્ધં ચ નૈવ યાતિ પ્રમાણતામ્ ॥ ૧૮॥

દેહસ્ય વાચકાઃ શબ્દાઃ પર્યવસ્યન્તિ દેહિનિ ।
સર્વશબ્દૈકવાચ્યસ્તદ્ રામઃ સર્વશરીરકઃ ॥ ૧૯॥

ઇતિ પ્રતિપક્ષિભયઙ્કુર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધાન્તશિરોમણિ પ્રણીતાયાં પ્રમાણદીપિકાયાં
શબ્દપ્રમાણનિરૂપણાખ્યસ્તૃતીયો મયૂખઃ ॥ ૩॥

શ્રિયાનન્દાર્યશિષ્યેણ હર્યાનન્દેન નિર્મિતા ।
પ્રકાશિકા પ્રમાણાનાં ભૂયાત્ પ્રમાણદીપિકા ॥ ૨૦॥

(શ્રીહર્યાનન્દાચાર્ય શતાબ્દ્યાં શ્રી હર્યાનન્દાચાર્યોપદિષ્ટઃ પ્રબન્ધઃ)

Proofread by Parashara Ranganathan

*Pramanadipika*
pdf was typeset on January 28, 2024

Please send corrections to *sanskrit@cheerful.com*